 ISSN 976-8645

# साम्प्रतिकसमस्याः समाधानञ्च

योगानन्द झा[९२]

वयमिदानीं यान्त्रिकयुगे निवसामः। सर्वाणि कार्याणि प्रायः यन्त्रमाध्यमेन सम्पाद्यन्ते। यन्त्राणि अस्माकं पार्श्वे सम्बन्धिवद्विराजन्ते। सर्वत्र सर्वस्मिन् सम्बन्धे परिवर्तनं परिलक्ष्यते। जनाः सर्वदा नूतनत्वं वाञ्छन्ति। भौतिकवातावरणस्य प्रभावःसर्वस्मिन् क्षेत्रे प्रतीयते। शिक्षायान्तु क्रान्तिरागता। सम्पूर्णसंसारस्य देशाः भौतिकोन्नतये यतमाना विराजन्ते। जनाः स्वभौतिकोन्नतये किमपि कर्त्तुं शक्नुवन्ति। ते चिन्तयन्ति यत् संसारिकसुखभोगादय एव अस्मभ्यमुत्तमाः। भवतु नाम। परन्त्वत्रापरपक्षं दृष्ट्वा सहृदयाः क्रन्दमानाः सन्ति, चेखिद्यन्ते च तेषां मनांसि। इदानीं विकासेन सह विनासं प्रति वयमुन्मुखाः स्म। जनानां सामाजिकसम्बन्धः शैथिल्यमगात्। सोदरभ्रातृषु युद्धं प्रचलति। सर्वत्र सर्वदा चौरकार्यं ,तस्करी, उत्कोचकर्षणं , ताडनं , मारणं, भावाकर्षणं कृत्वा अपकार्यसम्पादनम्, जनानां स्वेच्छाचारिता, धूमपानं, मदिरापानं, दुष्टसिद्धान्तस्य प्रचारः, प्रसारः, शारिरिकदौर्बल्यं, मानसिकदौर्बल्यम् , आर्थिकसमस्या, प्राकृतिकापत्, अग्निकाण्डं, युवकानां युवतीनाञ्चात्महननं, जनेषु नैराश्यं, पापाचरणं, प्रतिभाक्षरणं, शिक्षां प्रति अरुचिप्रकटनं, असंवैधानिककार्यसम्पादनं, महिलाभिस्सह दुर्व्यवहारः,परेषामवमाननं, भ्रामकसिद्धान्तपालनं, परिपोषणं, पतिपत्नयोः सम्बन्धोच्छेदः(तलाक), पितृघातः, गुरुशिष्यसम्बन्धोच्छेदः,चारित्रिकपतनं, नैतिकभ्रष्टता, विवेकाभावः, स्वार्थस्य प्राबल्यं, कुत्सितमानसिकता, वर्गसंघर्षः, जातिसंघर्षः, पारिस्थितिकासंतुलनं, प्रदूषणम्, अशिक्षा, आहारभ्रष्टता, स्वास्थ्यहानिः, भौतिकविज्ञानस्य दुरुपयोग , इत्याद्यः समस्यायाः मुखं विस्तर्य समुपस्थिताःसन्त्यस्माकं पुरतः। किमेतासां समस्यानां समाधानमस्ति उत नेति प्रश्नः ?

अवश्यमेवैतासां समस्यानां समाधानं विद्यते। यदि समाधानं वाञ्छन्ति तर्हि संस्कृतं शरणम्।

अपरा च -इदानीन्तनकाले शिक्षका अपि कर्त्तव्यभ्रष्टाः दृश्यन्ते। मात्रमेव वाग्दानेन सर्वं कार्यं सम्पादयितुमिच्छन्ति। वस्तुतो विवेकस्यायं विषयः। वाग्दानावसरे शिक्षकाः सर्वान् गुणान् धारयित्वा भगवद्विष्णुवदात्मानं प्रकटयन्ति। बहवो वदन्ति यत् शिक्षकानां कृते नैजं सुखं नास्ति, तस्य परिवारः राष्ट्रं ,छात्रा एव पुत्राः। शिक्षणाय भार्यायाः, पुत्रस्य, पुत्र्याः, परिवारस्य त्यागो यद्यपेक्षितः तर्हि कर्त्तव्यः। सत्यमिदमङ्गीकरोमि। परन्तु लोभस्य त्यागो न कर्त्तव्यः, छात्राणां शोषणं कर्त्तव्यं, तस्य रक्षणं न कर्त्तव्यं, कक्षायां पाठनावसरे वञ्चनं कर्त्तव्यं, छात्राणां मनोरञ्जनं कृत्वा कालयापनं कर्त्तव्यं,चारित्रिकपतनं कर्तव्यं , यथा कथञ्चिद्धनमपहर्त्तव्यं,स्वेच्छाचारः कर्त्तव्यः, अध्यापनं न कर्त्तव्यं मात्रमेव दीर्घसमासवाक्यैः कार्यसम्पादनमिति **मात्सर्यमुत्सार्य विभावयन्तु विबुधाः किमेतादृशी स्थितिरस्ति न वा ?** मान्याः। छात्राः अस्माकं राष्ट्रस्य भविष्यनिधयो भवन्ति। अतोऽत्र ध्यानदातव्यमितिमे मतिः।

अस्माकं संस्कृतज्ञानामुद्घोषणा जेगीयते यत्- यदि कल्याणमीहन्ते संस्कृतमधीयताम् इति। न मात्रमेव वाग्व्यवहारः अपितु आदर्शोऽपि परिपाल्यते। इदानीं सम्पूर्णसच्चरित्रमानवनिर्णमाणस्यावश्यकता वरीवर्त्ति। शिक्षिता अपि सन्तो जनाः नैतिकरूपेण दुर्बलाः सन्तः पापाचरणं कुर्वन्ति कारयन्ति च। अतोऽत्र सज्ज्ञानस्यावश्यकता विद्यते। प्रचण्डाज्ञानविस्फोटे परिपालयिष्यत्यस्मान् संस्कृतम्। आदौ मनुष्येषु विवेकः भवतु। विवेकेन ज्ञानमुत्पद्यते। ज्ञानं स्वयं पवित्रं विराजते अन्यांश्च पुनाति। तदेवोच्यते श्रीमद्भगवद्गीतायां **-नहि ज्ञानेन सदृशं पवित्रमिह विद्यते[१]। इति** । ज्ञानं कथमागच्छेदिति प्रश्ने वदति-

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**

---

[92] शोधच्छात्रः.श्रीसदाशिवपरिसरः

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति**[२]। ।

ज्ञानप्राप्तये तत्त्वज्ञानिगुरव आवश्यका भवन्ति। अत एवोच्यते–

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः**[३]।।

शिष्यः श्रद्धया आत्मसंयमयुक्तस्सन् शिष्यधर्मरीत्या यदि गुरोः समीपं गत्वा प्रश्नं प्रक्ष्यति। गुरुः तमुपदेक्ष्यति रहस्यपूर्णज्ञानमिति निश्चप्रचम्। आधुनिकयुगे एषा शिक्षा अत्यन्तमुपकारिणी विराजते। शिष्याः धर्मपालनं कुर्युः, गुरवः स्वधर्मपालनञ्च। आचार्यः स्वशिष्यकल्याणाय हवनं कुर्यात् इति वदति उपनिषत्। तद्यथा–**अमायन्तु ब्रह्मचारिणः स्वाहा। विमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा**[४]। **इति।।**

आचार्यः लौकिकालौकिकहितसाधनाय हवनं कुर्यात् ,**यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽसानि स्वाहा। तं त्वा भगप्रविशनि स्वाहा। स मा भगप्रविशानि स्वाहा। तस्मिन् सहस्त्रशाखे निभगाहं त्वयि मृजे स्वाहा**[५]। **इति मन्त्रैः।**

अनेन प्रकारेण आचार्याः शिष्याश्च शास्त्रविहितकर्म कुर्वाणाः नैजं हितसाधनं कुर्वन्त्विति निर्दिशत्युपनिषद्। वस्तुतः शिक्षा राष्ट्रस्याधारभूता भवति अतः उत्तमशिक्षायै यत्नो विधेयः। गुरुशिष्यसम्बन्धस्योत्तमोदाहरणं **यमनचिकेतस्संवादे**[६] मिलति । अत्र यमसदृशः गुरुः , नचिकेतस्सदृशः शिष्यः उभयत्र आत्मसंयमो दृश्यते । अहो धन्यं भारतवर्षम्। इदानीम् एतादृशः सम्बन्धोऽपेक्षितः । अत एव भगवता पाणिनिनाऽभ्यधायि– **संख्या वंश्येन**[७], **इति वंशो द्विधा विद्यया , जन्मना च**[८]। अत्रादौ विद्यया उच्यते। आधुनिककालेऽपि अस्याः शिक्षाया आवश्यकता अस्त्येव। अधुना जनाः अखाद्यास्वाद्य स्वास्थ्यहननं कुर्वन्ति। यथा भोजनं भविष्यति तथैव शारीरिकमानसिकस्थितिः अतः आहारशुद्धिरपेक्षिता। आहारविषये सम्यग्विचारो विद्यते संस्कृतग्रंन्थे। मुख्यतया गीतायामुच्यते–

**नत्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**
**न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन।।**
**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा**[९]।।

किञ्च आहारस्त्रिविधः प्रोक्तः सात्विकराजसतामसभेदात्। तद्यथा–

**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः**[१०]।
**आयुः सत्त्वबलारोग्यसुखप्रीतिविर्वधनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।।**
**कट्वम्ललवणात्युष्णातीक्ष्णरूक्षविदाहिनः।**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः।।**
**यातयामं गतरसं पूति पर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्**[११]।।

यथा आहारस्तथैव व्यवहारोऽपि जायते। अत आहारशुद्धिः कर्त्तव्या यथा सम्भवम्।एषा शिक्ष सार्वतान्त्रिकी सार्वभौमिकी, सार्वकालिकी च वर्त्तते। सर्वस्मिन् काले अस्याः आवश्यकता अस्ति।

ये जनाः नैराश्यमवलम्बन्ते तेभ्योऽर्जुनमाध्यमेन भगवान् निगदति –

**क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।**[१२]

कर्म प्रशंसन्नाह–

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।**[१३]

अपि च –

**योगः कर्मसु कौशलम्** [१४], **कार्यं कर्म समाचार**[१५], **कर्मण्येवाधिकारस्ते**[१६], **किं कर्म किमकर्मेति**[१७], **कर्मणो ह्यपि बोद्धव्यं**[१८], **संन्यासः कर्मयोगश्च**[१९], **नियतं कुरु कर्मत्व**[२०]**। कार्यमित्येव यत्कर्म**[२१], **इत्यादि वाक्यैः,** कर्मवादं समर्थयति श्रीमद्भगवद्गीता।

मुख्यरूपेण संसारे विवादस्य कारणं स्तुतिर्निन्दा च । अत उद्बोधयत्यस्मान् गीता–

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।**[२२]
**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।**
**मर्य्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।**[२३ इति]

सम्प्रति पारिवारिककलहः सर्वत्रात्मानं विस्तारयन् हसति। भ्राता भ्रातरं हन्ति क्रोधवशाल्लोभवशाच्च। स्थलेऽस्मिन् श्लोकोऽयमस्मान् सनाथयति। तद्यथा–

**देशे देशे कलत्राणि देशे देशे च बान्धवः।**
**तं तु देशं न पश्यामि यत्र भ्राता सहोदरः।।**[२४]

किञ्च–

**जननी जन्मभूमिश्च जाह्नवी च जनार्दनः**[२५]**।**
**जनकः पञ्चमश्चैव जकारः पञ्च दुर्लभाः।। १५७-१७० इति**

सत्यमिदं प्रतिभाति। कलत्राणि, बान्धवाः, अन्यसहोगिनश्च प्रायः सर्वत्र भवितुमर्हन्ति , परन्तु न सहोदरः। तथैव कश्चिद्विशिष्ट उद्गारः **जननी जन्मभूमिश्च हृदयमान्दोलयति , अस्मान् जनन्याः सेवायै, जन्मभूमेः सेवायै च प्रेरयति।** वाल्मीकीयरामायणे लोकतन्त्रस्य बीजं मिलति। राष्ट्रं कथं स्यादस्मिन् विषये उच्यते –

**प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः।**
**निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः।।**
**न पुत्रमरणं केचिदद्रक्ष्यन्ति पुरुषाः क्वचित्।**
**नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रता।।**
**न चापि क्षुद्भयं तत्र न तस्करभयं तथा ।**
**नगराणि च राष्ट्रानि धनधान्ययुतानि च।।**
**नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा।**[२६]

प्रायः जनाः उपकाराय प्रत्युपकारं वाञ्छन्ति। परन्तु श्रीरामे एतादृशी स्थितिर्नास्ति । तद्यथा–

**कदाचिदुपकारेण कृतेनैकेन तुष्यति।**
**न स्मरत्युपकाराणां शतमप्यात्मवत्तया।**[२७]

अत्र कृतज्ञतायाः स्तुतिर्वर्तते। मनुष्यः कृतज्ञो भवेदित्याशयः श्लोकस्यास्य। तथा च उत्तररामचरिते–

स्नेहं दया च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा[२८]।।

वर्तमानकाले राजव्यवस्था नास्ति, परन्तु अधिकारिणः एतान् गुणान् धारयितुं शक्नुवन्ति। अधिकारिष्वेव प्रजारक्षणस्य दायित्वं विद्यते । अत एवात्र अधिकारिणः धर्मस्य रक्षकाः , स्वजनस्य (प्रजायाः) च रक्षकाः, विचक्षणाश्च

भवेयुः। अधिकारिणः नियमान् दृढतया पालयेयुः। अधिकारिणो यदि अकर्त्तव्यपरायणाः भवन्ति तर्हि राष्ट्रे अराजकतापत्तिः। राष्ट्रे सत्यामराजकतायां विभिन्नोत्पाताः उत्पद्यन्ते। तथैवोच्यते–

**नाराजके जनपदे सिद्धार्थाव्यवहारिणः।**
**सायांह्ने क्रीडितुं यान्ति कुमार्यो हेमभूषिताः।।**
**नाराजके जनपदे धनवन्तः सुरक्षिताः।**
**नरा निर्यान्त्यरण्यानि नारीभिः सह कामिनः।।**
**नाराजके जनपदे योगक्षेमः प्रवर्त्तते।**
**राजपुत्रा विराजन्ते वसन्ते इव शालिनः।।**
**नाराजके जनपदे स्वकं भवति कस्यचित्।**
**मत्स्या इव जना नित्यं भक्षयन्ति परस्परम्।।**
**यथा ह्यनुदका नद्यो यथा वाप्यतृणं वनम्।**
**अगोपाला यथा गावस्तथा राष्ट्रमराजकम्**[२९] **।।**

अराजके जनपदे मत्स्या इव नित्यं भक्षयन्ति परस्परं , सत्यमिदं वचनम्। अधुना समाजे एतादृशी स्थितिः स्पष्टा । प्रायः प्रतिदिनं देशे अकाले मृत्युसमाचारः आगच्छति। न्यायालये जनसम्मर्दः सदा तिष्ठति। एतेन अस्माकं सामाजिकस्थितिः पुरतः समापतति। प्रायः प्राड्विवाकोऽपि न्यायालये स्वेच्छया वार्तां प्रस्तौति। एतेन कारणेन कदाचित् निर्दोषा अपि कारागारे गच्छन्ति। अवसरेऽस्मिन् न्यायशास्त्रे **अनुमानप्रमाणस्य**[३०] **, हेत्वाभासस्य**[३१] **च चर्च्चा विधीयते।** जनसामान्येभ्यः , अधिकारिभ्यश्च एतौ द्वौ पदार्थौ अवश्यमेव ज्ञातव्यौ भवतः।

यतो हि प्रपञ्चे कार्यसाधनाय सूक्ष्मबुद्धिरावश्यकी। अतो विचार्य कार्यं कर्त्तव्यमन्यथा विनाशो निश्चितः। सूक्ष्मबुद्धये हेतुहेत्वाभासयोर्ज्ञानं नितान्तमावश्यकम्। सद्धेतुं ज्ञात्वैव कार्यं विधातव्यम् । तदेव बोधयन्ति इमे श्लोकाः–

**हितानुबन्धमालोक्य कुर्यात् कार्यमिहात्मनः।**
**राजा सहार्थतत्त्वज्ञैः सचिवैर्बुद्धिजीविभिः।।**
**अहितं च हिताकरं धार्ष्ट्याज्जल्पयन्ति ये नराः।**
**अवश्यं मन्त्रबाह्यास्ते कर्तव्याः कृत्यदूषकाः।।**
**विनाशयन्तो भर्तारं सहिताः शत्रुभिर्बुधैः।**
**विपरीतानि कृत्यानि कारयन्तीह मन्त्रिणः।।**
**तान् भर्त्ता मित्रसंकाशानमित्रान् मन्त्रनिर्णये।**
**व्यवहारेण जानीयात् सचिवानुपसंहितान्**[३२] **।**

अर्थात् हिताहितं ज्ञात्वा जनाः व्यवहरेयुरिति। अत्र सूक्ष्मबुद्ध्या सद्धेतुमसद्धेतुं परिष्कृत्य अनुमानादिप्रमाणेन विज्ञाय कार्ये प्रवृताः भवेयुः। इदानीं परिवारे विवादस्य कारणमर्थनीतिरपि वर्त्तते। विषयेऽस्मिन् निगद्यते–

**धर्माय यशसेऽर्थाय कामाय स्वजनाय च।**
**पञ्चधा विभजन् वित्तमिहामुत्र च मोदते**[३३] **।। श्रीमद्भा.८.१९.३७**

एवम्प्रकारेण संस्कृते बहवः आधुनिकयुगोपयोगिनो विषयाः दृश्यन्ते। अत्र स्थालीपुलाकन्यायेन प्रदर्शितम्।

**व्याख्यान्तो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति**[३४] **।।**

धिया यथायोग्यं समाधानान्वेषणं भवितव्यम्। तेन सर्वेषां समुचितलाभो भविष्यति संस्कृतमाध्यमेन। अनेके विषयाः अधुनापि संस्कृतक्षेत्रे अनुद्घाटिताः सन्ति, तद्विषये विज्ञाः ग्रन्थाश्चैव शरणम्।

इति शम्

## सन्दर्भाः-

१.गीता-४.३८
२.गीता -४.३९
३. गीता-४.३४
४. तै. उ-
५.तै.उ
६. क.उ
७. अष्टा.-२.१.१९
८.सि. कौ. प्रकृतसूत्रवृत्तिः
९.गीता-६.१६,१७
१०.गीता-१७.७
११. गीता-१७.८,९,१०
१२.गीता-२.३
१३. गीता-२.४८
१४.गीता-२.५०
१५.गीता-३.१९
१६.गीता-२.४७
१७.गीता-४.१६
१८.गीता-४.१७
१९.गीता-५.२
२०.गीता-३.८
२१.गीता-१८.९
२२.गीता-१२.१३
२३.गीता-१२.१४
२४.सु.भा.-३६१.६
२५.सु.भा.-१५७.१७०
२६.वा.रा.बा.का.-१.९०-९४
२७.वा.रा.अयो.का.-१.११
२८.उ.रा.-१.१२
२९.वा.रा.अयो.का.-६७.१६,१७,१८,१९,२४,२८,३१,२९
३०.ग.अव.,न्या.भूमि.-२१पृ.
३१.न्या.पृ.-१२२,सर्वद.४०३.पृ.,तर्कभा.५९०-६१६
३२.वा.रा.यु.का.-६३.१३,१६,१७,१८
३३.श्रीमद्भा.
३४.परिभाषे.१प.

## सन्दर्भग्रन्थाः-

१. अष्टाध्यायीसूत्रपाठः , मिश्र डॉ रमाशङ्कर, मोतीलाल बनारसी दास , २०१०
२. उत्तररामचरितम्, त्रिपाठी डॉ. रमाकान्त, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००८

३. कठोपनिषद् गीताप्रेस गोरखपुर
४. गा. अवयवप्रकरणम्, चौखम्बाप्रकाशन, वाराणसी,२००६
५. तर्कभाषा, मुसलगाँवकर डॉ गजानन शास्त्री, चौखम्बा सुरभारती प्रकाशन,वाराणसी
६. तैत्तिरीयोपनिषद्, गीताप्रेस गोरखपुर
७. न्यायसिद्धान्तमुक्तावली, मुसलगाँवकर डॉ गजानन शास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२००८ ई.
८.न्यायसूत्रम् , झा डॉ महेश, चौखम्बासंस्कृतसीरीज ऑफिस, वाराणसी,२०१३
९.श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुर
१०. श्रीमद्भागवतम् ,गीताप्रेस गोरखपुर
११. श्रीमद्वाल्मीकीयरामायण, गीताप्रेस गोरखपुर
१२. सर्वदर्शनसंग्रहः , ऋषि प्रो. उमाशंकर शर्मा, चौखम्बा विद्याभवन, वाराणसी,२०१०
१३. सामान्यनिरुक्तिः , चौखम्बा संस्कृत भवन, वाराणसी २००७
१४. सिद्धान्तकौमुदी , नेने पण्डित श्रीगोपालशास्त्री, चौखम्बा अमरभारती प्रकाशन, वाराणसी, १९९७
१५. सुभाषितरत्नभाण्डागारम् ,काव्यतीर्थ नारायणराम आचार्य , चौखम्बासंस्कृतप्रतिष्ठान, २०११